Postal Regd.No. GAMC- 1553/2019-2021 ISSN 2454-6313

संस्कृत-साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकीपत्रिका)
वर्ष : १३ अङ्क : १५४
मार्च - २०१९

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2019-2021 issued by SSP Ahmedabad. Valid upto 31-12-2021. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### खर्जूरचर्वणकला

फाल्गुनमासे खर्जूरं नूतनेन माधुर्येण सह अवतरति। वल्लभाचार्यस्य स्तोत्रे श्रीकृष्णः मधुराधिपतिः अस्ति। खर्जूरस्य खादने मधुराधिपतेः कृष्णस्य अपि स्मरणं भवति चेत् तत् अप्रस्तुतं नास्ति। एवं कृष्णं खर्जूरं च संस्मरन् पत्न्या प्रेषितः स्यूतपाणिः अहं खर्जूरापणं प्रति चलितोऽस्मि।

खर्जूरं मह्यं रोचते, किन्तु दंष्ट्रा तथाविधं स्नेहबन्धं न सहते। खर्जूरस्य चर्वणमात्रेण दंष्ट्रा प्रतिकारं प्रारभते। द्वित्रवारं कृतेन दन्तधावनेन एव सा शाम्यति। एतस्याः पीडायाः कारणम् अहं वैद्यं पृष्टवान्। तेन उक्तम् – 'खर्जूरस्य चिक्कणः रसः भवतः दंष्ट्रायां श्लिष्यते, ततः पीडा जायते। भवान् खर्जूरं तथा खादतु यथा रसः न श्लिष्येत।' ततः प्रारभ्य अहं चर्वणकलायाः सम्यक् अभ्यासं कृतवान्। सम्प्रति प्रियं खर्जूरं प्रियजनम् इव सुखेन भोक्तुं शक्नोमि।

किं मनुष्यः खर्जूरस्य एव चर्वणं करोति ? नैव। सः क्वचित् धनस्य चर्वणं करोति...गृहस्य चर्वणं करोति...अधिकारस्य चर्वणं करोति...प्रसिद्धेः चर्वणं करोति...। भारतीये चिन्तने चर्वणस्य निषेधः नास्ति। चर्वणेन विना तु जीवनम् एव दुःसहं भवेत्। कः उपायः ? चर्वणं तथा करणीयं यथा रसः दंष्ट्रामूलं यावत् न प्रविशेत्। खर्जूरचर्वणम् इव प्रत्येकं कर्म नूतनाम् आसक्तिम् आनयति। ततः नूतना पीडा जायते। कर्मणः समूलः त्यागः शक्यः नास्ति, परन्तु कर्मफलत्यागः शक्य अस्ति। कर्मसङ्कुले जीवने कर्मणः लेपात् रक्षणं सुकरं नास्ति, किन्तु अशक्यम् अपि नास्ति। उपनिषदि ऋषिः आश्वासयति – आरभ्य कर्माणि गुणान्वितानि...। गुणयुक्तानि कर्माणि कुर्वन् मनुष्यः कर्मलेपात् मुक्तिं प्राप्तुम् अर्हति।

एते सिद्धान्ताः शास्त्रीयाः। व्यवहारचक्रे तथा नापि भवति। वयं जगति पश्यामः यत् मनुष्याणां वास्तविकं जीवनं तु भिन्नम् एव भवति। समाजे प्रशस्ताः अनेके लोकसेवकाः वर्तन्ते। तेषां सेवायां क्वचित् बुद्धस्य करुणा अपि दीव्यति। तथापि ते कर्मफलत्यागे निष्फलाः इव दृश्यन्ते। कर्मठेषु सेवकेषु अपि अनासक्तेः दीपः न ज्वलति। तस्मात् कारणात् प्रतिष्ठिताः सेवकाः अपि साधकाः भवितुं न शक्नुवन्ति। स्थूलं सेवाकर्म अपि सूक्ष्मं कर्मयोगं प्रति गतिं कुर्यात्। सकामं सेवाकर्म निश्चयेन प्रशस्यम् अस्ति, किन्तु तत् उपास्यं नास्ति।

क्वचित् 'सेवा' इति कर्णमधुरः शब्दः 'सम्मान' नाम्ना रोगेण ग्रस्तः भवति तदा भ्रान्तः सेवकः अहङ्कारस्य मधुशालायां जीवनं यापयति।

## स्वजनबोधः



वल्लभश्रेष्ठी रामपुरस्य प्रसिद्धः सुवर्णवणिक् । नगरस्य महाधनिकाः सर्वे तस्मिन् विश्वासं कुर्वन्ति स्म। अतः ते सर्वविधानि आभूषणानि तस्य आपणात् एव क्रीणन्ति स्म । तस्य रामदेवः वासुदेवः चेति यमलौ पुत्रौ । वल्लभः तत्पत्नी च पुत्रौ महता प्रेम्णा पालयतः स्म । यतः बहूनां वर्षाणां स्वप्नस्य साकारभूतौ आस्तां तौ। प्रीतिः अधिका: इति कारणेन तयोः आसक्तिः न आसीत् पठने। सर्वदा मित्रैः सह भ्रमणं क्रीडनं च तयोः कार्यम् आसीत्।

पुत्रयोः एतादृशं व्यवहारं दृष्ट्वा वल्लभः चिन्ताक्रान्तः सन् पत्नीम् उक्तवान् – "एतौ भवती अधिकतया प्रीत्या पोषितवती । अतः इदानीं तौ दायित्वविहीनौ अयोग्यौ च जातौ स्तः । मम मरणानन्तरं न जाने, तौ वाणिज्यदायित्वं कथं निर्वक्ष्यतः" इति।

तदा तस्य पत्नी अवदत् – "अस्माकं समीपे अमिता सम्पत्तिः अस्ति, यस्याः च उपयोगतः अस्माकं प्रपौत्रादयः अपि सुखेन जीवनं कर्तुं शक्नुयुः। अतः एतौ परिश्रमं न कुरुतः चेदपि न कापि हानिः" इति।

एतया सह एतस्मिन् विषये चर्चाकरणं व्यर्थमेव इति विचिन्त्य वल्लभः तूष्णीकः अभवत्।

दिनद्वयानन्तरं पुत्रौ आहूय सः अवदत् – "विजयः नाम मम मित्रं कर्णपुरे वसति। एतत् पत्रं तस्मै दत्त्वा आगन्तव्यम्। एतत् बहु रहस्ययुक्तं कार्यम्। अतः एव अहं भवन्तौ प्रेषयन् अस्मि। कर्णपुरं विशालं नगरम्। तत् दृष्ट्वा आगच्छताम्" इति। तौ तस्मिन् एव दिने कर्णपुरं प्रति प्रस्थितवन्तौ।

विजयः ताभ्याम् आनीतं पत्रं पठित्वा सर्वम् अवगत्य तयोः सत्कारं कृत्वा – 'नगरं दृष्ट्वा आगच्छताम्' इति उक्त्वा तौ प्रेषितवान्। विजयस्य पत्नी अपि तौ आदरेण एव दृष्टवती। विजयस्य अपि यमले पुत्र्यौ – श्रेष्ठा श्वेता च इति। सुन्दर्यौ बुद्धिमत्यौ च ते वासुदेवाय, रामदेवाय च अरोचेताम्।

सप्ताहानन्तरं वल्लभनिकटात् विजयस्य नाम्ना पत्रम् आगतम् । तस्मिन् पत्रे पुत्रौ सम्बोध्य वल्लभः लिखितवान् आसीत् – 'दिनचतुष्टयात् पूर्वं लुण्ठाकाः अस्माकम् आपणं प्रविश्य सर्वं चोरितवन्तः। समीकरणार्थं जनैः यानि आभूषणानि दत्तानि आसन् तानि अपि चोरितानि अभवन्। जनैः दत्तानि आभूषणानि मया न प्रत्यर्प्यन्ते चेत् जनाः मां दोषिणं भावयन्तः राजसमीपं नयेयुः। राज्ञा महादण्डनं दीयेत इति अपि। एतम् अपमानं सोढुम् अशक्नुवन् अहं ग्रामं त्यक्त्वा गच्छन् अस्मि। भगवतः कृपा अस्ति चेत् पुनः कदाचित् मेलिष्यामः" इति। पत्रं पठितवन्तौ वासुदेवरामदेवौ हतप्रभौ जातौ।

एतं विषयं ज्ञातवतः विजयस्य अपि व्यवहारे परिवर्तनम् आगतम्। सः तौ अवदत् – "कार्यहीनौ भवन्तौ सुखेन पोषयितुम् अहं भवतोः पिता इव कोट्यधिपतिः न। अतः भवन्तौ किमपि कार्यम् अन्विष्य आजीविकां प्राप्नुतः

चेत् वरम्'' इति।

एतत् अपमानं सोढुं तौ न शक्तौ। तथापि किं वा कुर्यातां वराकौ ? यतः तौ कार्यं किमपि न जानीतः स्म। कथञ्चित् धैर्यं प्राप्य – ''कृपया किमपि कार्यं दापयतु, येन जीवनं निरूढं भवेत्'' इति विजयम् एव दैन्येन निवेदितवन्तौ तौ। विजयेन तयोः कार्यस्य व्यवस्था कृता। स्वस्य एव आपणे गणना–लेखनकार्यं रामदेवाय तेन दत्तं, वासुदेवाय च उद्यानकार्यं दत्तम्। उद्यानकार्येण सह तत्र उत्पन्नानां शाकानां विपणौ विक्रयणम् अपि करणीयं भवति स्म वासुदेवेन। आरम्भे उभयोः अपि क्लेशः आसीत् कार्यकरणे। कदाचित् रामदेवः अनुजं वासुदेवम् उक्तवान् – ''विजयः महाकठोरः अस्ति इति इदानीं ज्ञायते मया। गणनायां दशरूप्यकाणां न्यूनता यदि भवेत् तर्हि तस्मिन् दिने मह्यं भोजनम् एव न ददाति सः'' इति।

''आम् , सत्यं भ्रातः। कण्डोलेषु शाकानि पूरयित्वा पञ्चक्रोशमितं दूरं नीत्वा विक्रयणं करोमि अहम्। शकटव्यवस्थाम् अपि न चिन्तयति सः। निर्दयः जातः अस्ति विजयः'' इति अवदत् वासुदेवः।

''प्रवृत्तं सर्वं विस्मरतु। पिता वदति स्म – अनुभूतस्य कष्टस्य फलं कदाचित् वा प्राप्येत एव इति। आवयोः जीवने अपि सुखमयानि दिनानि आगमिष्यन्ति एव'' इति सान्त्वनं कृतवान् रामदेवः।''

यथा यथा दिनानि व्यतीतानि तथा तथा तयोः कार्यकौशलं, कार्यतत्परता च अधिका जाता। गच्छता कालेन तौ वाणिज्यस्य तन्त्राणि अपि ज्ञातवन्तौ। विजयस्य पुत्र्यौ तयोः विषये आदरवत्यौ जाते। प्रतिमासं प्राप्यमाणे वेतने किञ्चित् अवशेषयन्तौ तौ किञ्चित् धनं सञ्चितवन्तौ अपि।

षण्णां मासानाम् अनन्तरं वल्लभः पत्न्या सह कर्णपुरम् आगतवान्। आगतौ मातापितरौ दृष्ट्वा पुत्रयोः नेत्रे अश्रुबिन्दुभिः पूर्णे जाते।

सर्वसमर्थयोः पुत्रयोः दर्शनेन मातापितरौ अपि परमानन्दं प्राप्तवन्तौ।

वल्लभः विजयम् अवदत् – ''मित्र ! या सम्पत्तिः लुण्ठिता आसीत् सा पुनः प्राप्ता अस्ति मया। इदानीं वयं स्वग्रामं गच्छामः। भवता कृताय साहाय्याय अनेके धन्यवादाः'' इति।

वल्लभस्य वचनानां रहस्यं ज्ञात्वा हसन् उक्तवान् विजयः – ''पुत्राभ्यां सह स्नुषे अपि नयतु भवान्। सौभाग्यात् एव मम पुत्र्यौ योग्यं पतिं प्राप्नुवत्यौ स्तः'' इति।

वल्लभः हर्षचित्तः भूत्वा विजयस्य प्रस्तावम् अनुमतवान्।

विवाहानन्तरं द्वितीये दिने विजयः एकान्ते वल्लभं पृष्टवान् – ''मम वस्त्रवाणिज्यात् अपि भवतः वाणिज्यं बृहत्। भवान् मत्तः अपि वाणिज्ये नितरां दक्षः। भवान् स्वयं पुत्रौ समीकृत्य कार्ये योजयितुम् अशक्ष्यत् एव। एवं स्थिते अपि चौर्यव्याजं कल्पयित्वा तौ मम निकटे कर्मकरौ किमर्थं कारितवान् भवान् ?'' इति।

'''यथा गृहपरिसरे प्रवृद्धं सस्यम् औषधाय न भवति तथा स्वजनैः कृतः उपदेशः अपि मूल्यवान् न भवति। यावत् तौ मम समीपे भवतः तावत् परिश्रमं न कुरुतः इति अहं जानामि स्म। अतः एव तौ मया भवत्समीपं प्रेषितौ। अत्र पूरकं वातावरणं सृष्टं भवता। अतः एव मम आशयः सिद्धः अभवत्। एतदर्थं कृतज्ञः अस्मि अहम्'' इति अवदत् वल्लभः।

अल्पेन एव कालेन रामपुरे वासुदेवः रामदेवः च प्रसिद्धौ भूत्वा 'पितुः अनुरूपौ पुत्रौ' इति ख्यातिं प्राप्तवन्तौ।

यमल – twins, वराक – the poor fellow

# वसन्तर्तुः

डॉ. सुरेश्वरः झा

वसन्तः अतिमोदावहः समयः । अद्भुतं परिवर्तनम् अस्मिन् समये प्रकृतौ दृश्यते । समयोऽयं भावुकहृदयानां कवीनां दयिततरः वरीवर्ति।

समयविभागस्य एकं परिमाणं ऋतुः भवति। द्वयोर्द्वयोः मासयोः एकैकः ऋतुः प्राचीनकालात् एव मन्यमानः विद्यते। तद्दृष्ट्या भारतीयपरम्परायाम् एकस्मिन् वर्षे षड् ऋतवः भवन्ति। ते च इमे हेमन्त-शिशिर-वसन्त-ग्रीष्म-वर्षा शरन्नामानः सन्ति। मार्गशीर्षात् आरभ्य मासद्वयस्य एकैकः ऋतुः गण्यते। अग्रहण-पौषयोः हेमन्तः। माघ-फाल्गुनयोः शिशिरः । चैत्र-वैशाखयोः वसन्तः । ज्यैष्ठा-षाढयोः ग्रीष्मः । श्रावण-भाद्रपदयोः वर्षा । आश्विन-कार्तिकयोः शरद् ऋतुः इति एष एव क्रमः भारतीयपरम्परा-प्राप्तः सर्वजनमान्यः।

एषाम् ऋतूनां वसन्तः मनोरमतमः भवति। चतसृषु दिक्सु अतीव शोभना परिस्थितिर्भवति। वृक्षाः पुराणानि पत्राणि विसृज्य नूतनकिसलयवन्तः सञ्जायन्ते। विविधाः लताः पुष्पवत्यः भवन्ति। सहकार-वृक्षेषु मञ्जर्यः जायन्ते। मञ्जरीषु आम्राणि भवन्ति । विविधैः कुसुमैः प्रकृतिः अलङ्कृता भवति । कुसुमानां सुगन्धेन दिशः मनोमोहिकाः भवन्ति। सहकारवृक्षेषु कोकिलाः कूकूरवम् अतिमधुरं कुर्वते कर्णामृतम्। जनानां मनांसि प्रफुल्लितानि भवन्ति। सर्वं वस्तु चारु तरं रूपं विभर्ति। अत एव एष ऋतुः ऋतूनां राजा अभिधीयते। समय इदानीम् अति-विलक्षणः भवति। नहि हेमन्त-शिशिरयोः शरीरावयव-संकोचकारि शैत्यं भवति। न च वा निदाघ-वर्षयोरतितरां तापदायी रवेरातपो भवति। समशीतोष्णतया अपि शीतातपाहतो जनः समयमिमम् अतितरां रोचयति । कुसुमसमृद्ध्या, फलचयचारुवत्तया, नवपल्लवमनोरमतया च समयः विलक्षणविभूतिमान् परिलक्ष्यते। 'ऋतूनां कुसुमाकरः (गीता-१०.३५)' इत्यभिदधानो भगवान् इमम् समयम् आत्माभिन्नम् साधु प्रतिपादयति।

अस्मिन् समये भोज्यवस्तूनि अपि प्रचुराणि तिष्ठन्ति। नवीनम् बहुविधम् वासन्तिकम् अन्नम् प्रादुर्भवति। अचिरेऽतीते समुत्पन्नं हैमन्तिकं धान्यं भारतवर्षस्य प्रधानमन्नं न केवलं प्रभूत-भूधारिणाम् एव गेहेषु अपितु स्वल्प-क्षेत्रवतां केदारविहीनानामपि भूयसां श्रमजीविनां तृण-पर्णोटजेष्वपि श्रमार्जनसञ्चितं सावशेषं तिष्ठति । उत्पन्नेषु विविधफलेषु मधुरतमस्य आम्रफलस्य उत्पत्तिः जनानां प्रमोदाय भवति। प्राणिनः अधिकं प्राणवन्तो भवन्ति। पुरुषाः कामिनो भवन्ति । प्रमदाः प्रकामं कामिन्यः सञ्जायन्ते । कुसुमशरः प्रभूतानि सुमनांसि शरान् अवाप्य बलवान् बोभवीति । शर-प्रक्षेप-समुत्साह-सम्पन्नः पौनःपुण्येन युवजनमनांसि-विध्यतितराम् । कोकिलारवः, शीतलः, सुगन्धिर्वायुः, सहकारसम्वर्तिकाः, परितः प्रकृतेः तारुण्यपूर्णं रूपम् - इति सर्वाणि अतितराम् उद्दीपकानि बोभुवति। सर्वेषां जीवने काचित् विलक्षणा उन्मादकरी स्थितिः भवति। मधुपान-मत्ताः मधुकराः गुञ्जनेन जनान् प्रीणयन्ति।

परन्तु अस्मिन् समये किञ्चिद्भयावहम् अपि एतद् भवति यत् सर्पाः बिलेभ्यो बहिरायान्ति । अथापि दुःखदम् एतत् यद् दवेषु दवाग्निः वन्यान्, ग्रामेषु प्रकुपितोऽग्निः ग्राम्यान् अपि बहुत्र बहुधा निराश्रितान् करोति । (वामः कामो विरहिणम् तज्जायाञ्च खेदयित्वा दुर्बलीकरोति परन्तु एतत् नहि अनभीष्टम्।) अपहाय विषयान् इमान् वस्तुतो वस्तूनि चारूणि भवन्ति। सम्यगुक्तं कविकुलगुरुणा 'सर्वं प्रिये! चारुतरं वसन्ते' इति।

# मासवार्ता:

## सम्पन्न: भव्य: संस्कृतसङ्गीतोत्सव:






संस्कृतभाषाया: प्रचाराय एकलव्य-संस्कृत-एकेडेमी नित्यनवीनप्रयोगान् चिन्तयति। तस्मिन् एव उपक्रमे एकलव्य-संस्कृत-एकेडेमीसंस्थाने फरवरीमासस्य २४ दिनाङ्के संस्कृतसङ्गीतोत्सवस्य भव्यम् आयोजनम् अभवत्।

अहमदाबादनगरे प्रकाशविद्यालयस्य सभागारे आयोजितेऽस्मिन् कार्यक्रमे संस्कृतस्तोत्राणां प्राचीनार्वाचीनकविभि: रचितानां संस्कृतगीतानां सुमधुरं गानं श्रीमतीनम्रताबेन शोधन, श्रीधवलकुमार:, डॉ. धैर्या मांकड च अकुर्वन् । कार्यक्रमस्य सुन्दरं सञ्चालनं नेहाकृष्णकुमार अकरोत् । कार्यक्रमेऽस्मिन् चतुर्शताधिका: संस्कृतरसिका: सोत्साहं भागम् अवहन्। कार्यक्रमोऽयं सफल:।

## आरब्ध: छन्द:परिचयवर्ग:

छन्दस: अध्ययनं कर्तुम् इच्छुकानां छात्राणां कृते एकलव्य-संस्कृत-एकेडेमी प्रतिवर्षं 'छन्द:परिचय:' इति अभ्यासक्रमं सञ्चालयति । एतस्मिन् वर्षेऽपि फरवरीमासस्य ११ दिनाङ्के अभ्यासक्रमोऽयम् आरब्ध: वर्तते । अभ्यासक्रमेऽस्मिन् छात्रा: प्रसिद्धानां छन्दसाम् अध्ययनं करिष्यन्ति। श्रीभाविन् पाठक: छात्राणां मार्गदर्शनं कुर्वन् अस्ति।

## कृपया हसन्तु

श्रीचन्द्रशेखरः ऐयरः

पुत्रः - (पितरम् उद्दिश्य) भोः पितः ! द्वापरयुगे भक्तः प्रह्लादः तस्य पितुः वचनं न अशृणोत् । सत्ययुगे श्रीरामः सर्वदा तस्य पितुः वचनस्य पालनम् अकरोत् । कृपया मह्यं कथयतु, अहं भवतः वचनं पालयामि वा न पालयामि ।

पिता - भोः वत्स ! कलियुगे तु भवान् भवतः माता यत् वदति तदेव श्रुणोतु, पालयतु च एतदेव आवयोः कृते श्रेयष्करम् ।

★ ★ ★ ★ ★

कश्चन आपणिकः उच्चैः वारं वारम् उदघोषयन् आसीत् - "एकवारं चतुर्शतं रूप्यकाणि व्ययीकुर्वन्तु ततः आजीवनम् उपविश्य सन्तोषेण भोजनं कुर्वन्तु" इति ।
अहं तत् श्रुत्वा कुतूहलेन बहिः गत्वा अपश्यम् ; सः चतुर्शतरूप्यकैः आसन्दं विक्रीणिते स्म ।

★ ★ ★ ★ ★

चतुष्पथे यातायातसङ्केतसमीपे कश्चन भिक्षुकः भिक्षां याचते स्म । कश्चन वाहनचालकः भिक्षुकाय पञ्चरूप्यकाणि अददात् । तत् दृष्ट्वा भिक्षुकः अवदत् - "एषः तु अन्यायः अस्ति ।" भिक्षुकस्य वचनं श्रुत्वा वाहनचालकः साश्चर्यम् - "कीदृशः अन्याय ?" इति अपृच्छत् । "पूर्वतन सङ्केतस्थाने तु भवान् पञ्चाशत् रूप्यकाणि दत्तवान् मह्यं किमर्थं पञ्चरूप्यकाणि एव" इति भिक्षुकः अपृच्छत् । "त्वया कथं तत् ज्ञातं" इति यानचालकः पुनः अपृच्छत् । "अस्माकं 'WhatsApp' समूहः अस्ति" इति भिक्षुकः उदतरत् ।

## अहो चातुर्यम्

– संस्कृतविकिपिडीयाजालस्थानात्

**चीयते चित्तविस्फूर्तिः चीयते कायिकं बलम् ।**
**चीयते पटुता वाचि तस्माच्चाय इति प्रथा ॥**

लोके तादृशः प्रायः कोऽपि नास्ति, यश्च 'चायपेयं' न जानीयात् । एतस्य पेयस्य 'चाय' इति नाम किमर्थम् आगतम् ? कविः वदति – 'एतस्य पानात् स्फूर्तिः चीयते (वर्धते), शरीरबलम् अपि चीयते, वचनपाटवम् अपि चीयते । एवं मनसः कार्यस्य वचसः च शक्तेः चायकस्य एतस्य पेयस्य नाम 'चाय' इति जातम्' इति । न वयं विप्रतिपत्तिं वदामः कवेः नामकरणविषये ।


**पयःसत्त्वं कापियूषस्तमः, शर्करिकारजः ।**
**गुणत्रययुता माया कापि काफीति कथ्यते ॥**

'काफी' नामकं पेयं मायाशबलितम्, गुणत्रयात्मकं च । तस्य मोहकगुणकारणतः मायामयत्वं कदाचित् अङ्गीक्रियेत । किन्तु त्रिगुणात्मकता कथम् ? कविः वदति – 'पयसः सत्त्वगुणः (श्वेतत्वात्) पूर्णकषायस्य तमोगुणः (कृष्णमयत्वात्) शर्करिकायाः रजोगुणः (चूर्णमयत्वात्) च तस्मिन् अस्ति' इति ।

पेयेऽस्मिन् यद्यपि सात्त्विकता सर्वथा नास्ति, तथापि कविना या युक्तिः दर्शिता तदनुगुणं चिन्तयामः चेत् सत्त्वगुणोपेतत्वम् अपि अङ्गीकरणीयम् एव ।

# ज्ञानसरिता

**सस्यानाम् आत्मरक्षणक्रमः**



द्रव्येषु सचेतनानि अचेततानि चेति विज्ञानपुस्तकेषु द्वैविद्यं कल्प्यते । सस्यानि सचेतनेषु अन्तर्भवन्ति इति वयं जानीमः एव । प्रसिद्धः सस्यशास्त्रज्ञः जगदीशचन्द्रबोसवर्यः सप्रमाणं निरूपितवान् अस्ति यत् सस्यानि अपि परिसरानुगुणं स्पन्दन्ते इति।

एषु दिनेषु क्योटोविश्वविद्यालयस्य विज्ञानिनः अपरम् अंशं प्रमाणीकृतवन्तः सन्ति। स च – सस्यानि परस्परं 'भाषन्ते' इति। यदा विपत्तिः उपस्थिता भवति तदा समीपस्थाय सस्याय तैः सन्देशः प्रेष्यते। एतत् सन्देशप्रेषणं विविधैः प्रकारैः सम्भवति। कानिचन सस्यानि रासायनिकसद्रव्यद्वारा सन्देशं प्रेषयन्ति।

एतं प्राप्तवन्ति तत्परिसरस्थानि अन्यानि सस्यानि अवगच्छन्ति यत् अस्माभिः रक्षणोपायः चिन्तनीयः इति। विषांशोत्पादनद्वारा कण्टकादिद्वारा च सस्यानि आत्मरक्षणं चिन्तयन्ति।

## शब्दमञ्जूषा

| | | |
|---|---|---|
| **शायकः** | बाण | an arrow |
| **शालिः** | चावल | rice |
| **शावकः** | बच्चा | Child |
| **शिक्थम्** | मोम | wax |
| **शिखा** | चोटी | lock of hair |
| **शिञ्जिनी** | धनुष की डोरी | a bow String |
| **शिथिल** | ढीला | Loose |
| **शिबिका** | पालकी | a palanquin |
| **शिलीमुख** | भौरा | a bee |
| **शिल्पम्** | कारीगरी | Craft |
| **शिवकः** | खम्भा | a pole |
| **शिशिर** | ठंडा | Cold |
| **शीकरः** | जलकण | a drop of water |
| **शीर्षम्** | सिर | head |
| **शीलम्** | चरित्र | Character |

## किं भवन्तः जानन्ति ?

**१ ) द्रोपदीपुत्रेषु ज्येष्ठः कः आसीत् ?**

(क) सुतसोमः (ख) प्रतिविंध्यः (ग) शतानीकः (घ) श्रुतकर्मा

**२ ) शैब्यः सुग्रीवः मेघपुष्पः, बलाहकः च एते अश्वाः कस्य रथस्य आसन् ?**

(क) अर्जुनस्य (ख) भीष्मस्य (ग) द्रौणस्य (घ) श्रीकृष्णस्य

**३ ) महाभारतस्य वृत्तान्तं द्वारिकायां वसुदेवं कः श्रावितवान् ?**

(क) अर्जुनः (ख) कृष्णः (ग) दारुकः (घ) सात्यकिः

**४ ) पाण्डवानां महाप्रस्थानयात्रायां कः आदौ मृत्यं प्राप्तवान् ?**

(क) नकुलः (ख) द्रौपदी (ग) सहदेवः (घ) अर्जुनः

**५ ) पाण्डवानां महाप्रस्थानयात्रासमये कं स्वर्गं नेतुम् इन्द्रः रथम् आनयत् ?**

(क) भीमसेनम् (ख) अर्जुनम् (ग) युधिष्ठिरम् (घ) सहदेवम्

**६ ) श्रीकृष्णस्य जन्म कस्मिन् मासे अभवत् ?**

(क) फाल्गुन (ख) भाद्रपद (ग) श्रावण (घ) आश्विन

**७ ) अर्जुनस्य जन्म कस्मिन् मासे अभवत् ?**

(क) वैशाख (ख) फाल्गुन (ग) कार्तिक (घ) पौष

उत्तराणि – (१) ख (२) घ (३) ख (४) ख (५) ग (६) ख (७) ख

# अस्माकम् आगामिकार्यक्रमाः

"संस्कृतसाम्प्रतम्" मासिकस्य विषये पत्रक्रमाङ्क ४ अनुगुणं विवरणम्।

१. प्रकाशनस्थानम् - "एकलव्य संस्कृत एकेडेमी" कोरहाउस, ओफ सी.जी.रोड, परीमलगार्डन समीपम्, एलिसब्रिज, अमदावाद-६

२. प्रकाशनकाल: - मासिक:

३. मुद्रक: प्रकाशक :- मिहिर उपाध्याय: राष्ट्रियता - भारतीय:

४. सम्पादक: - मिहिर उपाध्याय: राष्ट्रियता - भारतीय:

संङ्केत: - 'एकलव्य संस्कृत एकेडेमी" कोर हाउस, ओफ सी. जी. रोड, परीमलगार्डन समीपम्, एलिसब्रिज, अमदावाद- ६

५. सदस्यनाम मिहिर उपाध्याय:, सम्पादक:

संङ्केत: - "एकलव्य संस्कृत एकेडेमी" कोरहाउस, ओफ सी.जी.रोड, परीमलगार्डन समीपम् एलिसब्रिज, अमदावाद- ६

अहं मिहिर उपाध्याय: घोषयामि यत्, उपरोक्ता: अंशा: नियमानुसारं योग्या: सन्ति।

दिनाङ्क: १/०३/२०१९

संस्कृत-
साम्प्रतम्

नमस्कार:
यदि भवन्तः "साम्प्रतम्" मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

| | |
|---|---|
| वार्षिकं रू | - 100 |
| द्वैवार्षिकं रू | - 175 |
| त्रैवार्षिकं रू | - 250 |
| अङ्कमूल्यं रू | - 10 |

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

## Admission Open

**Value Education Through Sanskrit**

## बालसंस्कारकेन्द्रम्

**(Class SKg to 4)**

**Date** : 9/6/19 to 12/4/20
**Day** : Sunday
**Time** : 11.00am to 12.30pm
**Fees** : 4500/-

## बालसंस्कृतवर्गः

**(Class 5 to 8)**

**Date** : 9/6/19 to 12/4/20
**Day** : Sunday
**Time** : 11.00am to 12.30pm
**Fees** : 4500/-

**Venue:** Core House, Off CG Road, Ah'bad
**Contact :** Dr. Mihir Upadhyay - (91) 098246 16237

**प्रियवाचकाः**
- भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।
- पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006